नं सुचारुशी

...रिनी अ

॥अथहरतालिकाव्रतकथाप्रारम्भः॥

ह
व्र
१

श्रीगणेशाय नमः ॥ अथ भाद्रपदशुक्लतृतीयायां शिष्टपरिगृहीतं हरितालिकाव्रतं तत्र तृतीया मुहूर्तमात्रसत्त्वेऽपि परे च या
द्या शिष्टा वारात् मुहूर्तमात्रसत्त्वेऽपि दिने गौरीव्रतं परे शुद्धाधिकायामप्येवं गणयोगप्रशंसनादिति माधवः उक्तं तु विधानादि
कामिव शुद्धाकामपि पराप्राप्यकप्रमाणाभावात्संपूर्णत्वेन द्वितीयायुतविधाप्रवृत्तोऽस्त्र पूर्वैव अत एव कलाकाष्ठा
थिवा चेव द्वितीयायां समदृश्यते सा तृतीया न कर्तव्या गणासंयुतेति स्कांदे सेति न क्षेहेन पूर्वेद्युर्द्वितीयायोगनिवृत्तिपूर्वकराव
चतुर्थीयुतायां विधिः संगच्छते एवं चतुर्थीसहितायां तु सा तृतीया फलप्रदेत्यापस्तंबीयमप्येतन्मतमेव तत्र च्छ्रुतिमूलक
ल्पनालाघवात् द्वितीयायुतानधिकात्तु सत्यपि निषेधे द्वितीयायुतैव कार्या गुणानुरोधेन प्रधानलोपस्यान्याय्यत्वा
त् अग्निहोत्रहवन्यालाभे निर्वापस्येव एकादश्यां तृतीया वा षष्ठी चैव तत्र व्रतविधिः मासपक्षाद्युल्लिख्य मम समस्तपा
पक्षयपूर्वकसप्तजन्मराज्यसौभाग्यादिविवृद्धये उमामहेश्वरस्य पूज्यसिध्यर्थं हरितालिकाव्रतं करिष्ये तत्रादौ गौ
री संयुक्तां महेश्वरं पूजयिष्ये अथ ध्यानं पीतकौशेयवसनां हेमाभां कमलासनां भक्तानां वरदां नित्यं पार्वतीं चिंत
याम्यहं मंदारमालाकुलितालकायै कपालमालांकितशेखराय दिव्यांबरायै च दिगंबराय नमः [illegible]यै च नमः
शिवाय ध्यानं देवि देवि समागच्छ प्रार्थयेऽहं जगन्मये इमां मया कृतां पूजां गृहाण सुरस[illegible]यानं नमः आ

वाहनं भवानी त्वं महादेवी सर्वसौभाग्यदायके अनेकरत्नसंयुक्तमासनं प्रतिगृह्यतां आसनं सुचारु शीतलं दिव्यं
नानागंधसमन्वितं गृहाण देवदेवेशि महादेवि नमोस्तु ते पाद्यं श्रीपार्वती महाभागे शंकरप्रियवादिनी अर्घ्यं गृहाण
कल्याणि भर्त्रा सह पतिव्रते अर्घ्यं गंगाजलसमानीतं सुवर्णकलशे स्थितं आचम्यतां महाभागे रुद्रेण सहिते नघे
आचमनं गंगासरस्वतीरेवापयोष्णीनर्मदाजलैः स्नापितासि मया देवि तथा शांतिं कुरुष्व मे उक्तमंत्रैः पंचामृतस्नानं
आपोहिष्ठेइति शुद्धोदकं सर्वभूषाधिके रम्ये लोकलज्जानिवारणे मयोपपादिते तुभ्यं वाससी प्रतिगृह्यतां वस्त्रं
उपवीतं च कुंकुमागरुकर्पूरचंदनं मृगनाभिजं विलेपनं महादेवि गंधं दास्यामि भक्तितः गंधं हरिद्राकुंकुमं च रंजि
ताकुसमोधेन अक्षताश्चातिशोभनाः मया देवि प्रदानेन प्रसन्ना भव पार्वती अक्षताः मल्लिकाबकुलचंपकपाटला
लाब्जपुन्नागजातिकरवीररसालपुष्पैः बिल्वप्रवालतुलसीदलमालतीभिस्त्वां पूजयामि जगदीश्वरि मे प्रसीद
पुष्पाणि देवद्रुमरससंभूतः कृष्णागरुसमन्वितः आनीतोयं मया धूपं भवानी प्रतिगृह्यतां धूपं त्वं ज्योतिः सर्वदेवानां
तेजसां तेज उत्तमं आत्मज्योतिः परं धाम दीपोयं प्रतिगृह्यतां दीपं अन्नं चतुर्विधं स्वादु रसैः षड्भिः समन्वितं भक्ष्यभोज्य
समायुक्तं नैवेद्यं प्रतिगृह्यतां नैवेद्यं सुनरायेशिनं मलयाचलसंभूतं कर्पूरेण समन्वितं करोद्वर्तनकं चारु गृह्यतां

ह॰व्र॰ जगतः पते चंदनेन करोद्वर्त्तनं इदं फलमिति फलं कर्पूरैलालवंगादिनां पूगीदलसंयुतं कामुकस्य फलं चैव तांबू
२ लं प्रतिगृह्यतां हिरण्यगर्भेति दक्षिणा वज्रमाणिक्यवैदूर्यमुक्ताविद्रुममंडितं पुष्परागसमायुक्तं कांचनं प्र
तिगृह्यतां सुवर्णपुष्पं चंद्रादित्यौ च धरणी विद्युदग्निस्तथैव च त्वमेव सर्वतेजांसि आर्तिक्यं प्रतिगृह्यतां नीराजनं
उमायै नमः गौर्यै नमः पार्वत्यै नमः ३ जगद्धात्र्यै ४ जगत्प्रतिष्ठायै ५ शांतिरूपिण्यै नमः ६ हराय ७ महेश्वराय ८ शंभवे
९ शूलपाणये ॰१॰ पिनाकधृषे ॰११ शिवाय ॰१२ पशुपतये ॰१३ महादेवाय नमः १४ पुष्पांजलिं पानिकानि चेति प्रद
क्षिणा अन्यथेति नमस्कारः ततो वैणवपात्रस्थं वायनं दद्यात् अन्नं सुवर्णपात्रस्थं सवस्त्रफलं दक्षिणा वायनं गौ
रि विप्राय दास्यामि श्रीतये तव सौभाग्यारोग्यकामानां सर्वसंपत्समृद्धये गौरीगिरिशांतु समर्थं वायनं तं ते ददाम्यहं इति मं
त्राभ्यां वायनं दद्यात् अथ कथा व्यास उवाच कैलासे शिखरे रम्ये गौरी पृच्छति शंकरं गुह्याद्गुह्यतरं गुह्यं कथयस्व म
हेश्वर १ सर्वेषां सर्वधर्माणां अल्पायासं महत्फलं प्रसन्नोसि यदा नाथ तथा ब्रूहि ममाग्रतः २ केन त्वं हि मया प्राप्तस्त
पोदानव्रतादिना अनादिमध्यनिधनो भर्त्ता चैव जगत्प्रभुः ३ ईश्वर उवाच शृणु देवि प्रवक्ष्यामि तवाग्रे व्रतमुत्तमं यद्गो
प्यं मम सर्वस्वं कथयामि तव प्रिये ४ यथा चैडुगणे चंद्रो ग्रहाणां भानुरेव च वर्णानां च यथा विप्रो देवानां विष्णुरेव च

नदीषुचयथागंगाउशास्त्राणांचभारतं वेदानांचयथासामइंद्रियाणांमनोयथा ६ पुराणेवेदसर्वस्वं आगमेनयथोदितं।
एकाग्रेणशृणुष्वेनयथादृष्टंपुरातनं ७ येनपुण्यप्रभावेनप्राप्तमर्धासनंमया तत्सर्वंकथयस्वेहत्वंममप्रेयसीयतः ८
भाद्रेमासिसितेपक्षेतृतीहस्तसंयुक् तदनुष्ठानमात्रेणसर्वपापैःप्रमुच्यते ९ शृणुदेवित्वयापूर्वंयद्भुक्तंचरितंमहत्
तत्सर्वंकथयिष्यामियथाजातंहिमालये १० पार्वत्युवाच कथंजातंमयानाथव्रतानामुत्तमंव्रतं तत्सर्वंश्रोतुमिच्छामित्व
त्सकाशान्महेश्वर ११ ईश्वरउवाच आसीत्तत्रमहादिव्योहिमवान्नगउत्तमः नानाभूमिसमाकीर्णोनानाद्रुमसमाकु।
लः १२ नानापक्षिसमायुक्तोनानामृगविचित्रितः यत्रदेवाःसगंधर्वाःसिद्धचारणगुह्यकाः १३ विचरंतियथादेविगं
धर्वाध्वनिसंकुलं स्फाटिकैःकांचनैःशृंगैर्मणिवैडूर्यभूषितैः १४ भुजैर्लिखन्निवाकाशंसुहृदोमंदिरंयथा हेमेनभू।
षितोनित्यंगंगाध्वनिनिनादितः १५ पार्वतीत्वंयथाबाल्येपरमाचरतीतपः अब्दद्वादशकंदेविधूम्रपानमधोमुखी १६
संवत्सरंचतुःषष्टीपक्वपर्णाशनंकृतं दृष्ट्वातातेनतत्कष्टंचिंतयादुःखितोभवत् १७ माघमासेजलेस्नानंवैशाखेचाग्नि
सेवनं श्रावणेचबहिर्वासाअन्नपानविवर्जिता १८ ततोदेवांवरतः प्राप्तोब्रह्मपुत्रस्तुधर्मवित् नारदोमुनिशार्दूलशैलपु।
त्रीदिदृक्षया दत्वार्घविष्टरंपाद्यंनारदायोक्तवान्गिरिः १९ शैलोवाच किमर्थमागतस्वामिन्त्वंमुनिसत्तम महद्भा

ह॰ अ॰ गेनसंप्राप्तत्वदागमनमुत्तमं १९ नारदोवाच शृणुहेशैलेंद्रमद्वाक्यंविष्णुनाप्रेषितोस्म्यहं योग्यंयोग्यायदातव्यंकन्यारत्नं।
३ मिदंत्वया २० वासुदेवसमोनास्तिब्रह्मविष्णुशिवादिषुतस्मैदेयात्वयाकन्याश्रयार्थेसमंतंमम २१ गिरिरुवाच वासुदेव
स्वयंदेवःकन्यांप्रार्थयतेयदि तदामयाप्रदातव्यात्वदागमनगौरवात् २२ इत्येवंगदितंश्रुत्वानभस्थंतदधेमुनिः पयो
पीतांवरधरंशंखचक्रगदाधरं २३ कृतांजलिपुटोभूत्वामुनीद्रस्तमभाषत २४ नारदोवाच शृणुदेवभवत्कार्यंविवा
होनिश्चितस्तव हिमवांस्तुतदागौरीमुवाचवचनंमुदा २५ दत्तासित्वंमयापुत्रीदेवायगरुडध्वजे श्रुत्वावाक्यंपितु
र्देवीसखीभिःसहितावने सिंहव्याघ्रमृगैर्व्याप्तंतत्रसुप्तासिनिर्जने २६ सख्युवाच किमर्थंदुःखितादेवीकथयस्वममा
ग्रतः पतोभवत्यभिप्रेतंतत्करिष्येहंनसंशयः २७ पार्वत्युवाचः सखिशृणुममपीतामनोभिलषितामम कपर्दीशंच
भर्तारंकरिष्येहंनसंशयः २८ एतन्मेचिंतितंकार्यंतातेनकृतमन्यथातस्माद्देहपरित्यागंकरिष्येहंसखिप्रियेपा
र्वत्यावचनंश्रुत्वासखीवचनमब्रवीत् ३० सख्युवाच पितामात्रनजानातिगमिष्यामोहितद्वनंइत्येवंसमतंकृ
त्वानीतासित्वंमहद्वनं ३१ पीतानिरीक्ष्यामासहिमवांस्तुगृहेगृहे केननीतासिमेपुत्रीदेवदानवकिंनरैः ३२ नारदा
ग्रेकृतंसत्यंकिंदास्येगरुडध्वजे इत्येवंचिंतयाविष्टोमूर्छितोनिपपातह ३३ हाहाकृत्वाप्रधावंतिलोकास्तेगिरि

सुगवं भुचुर्गिरिवरं सर्वे मूर्छा हेतुं गिरेर्वद् गिरिरुवाचः दुःखस्य हेतुं शृणु तत्कन्यारत्नं हृतं ममः दृष्टा वा कालसर्पेण
सिंहव्याघ्रेण वा हृता ३५ न जाने क्व गता पुत्री केन दुष्टेन वा हृता चकंपे शोकसंतप्तो वातेनेव महातरुः ३६ गिरिर्वं
नाद्वनं यातस्तदालोकनकारणात् सिंहव्याघ्रैश्च भल्लूकै रहितैः सहितं वनं ३७ त्वं चापि विविधै घोरैर्व्रजंती स
खिभिः सह तत्र दृष्टा नदी रम्या तत्तीरे च महागुहा ३८ तां प्रविश्य सखीसार्द्धं मन्नभोगविवर्जितः संस्थाप्य वालुका
पिंडं पार्वत्या सहितं मम ३९ यावत्तीर्थे भाद्रपदे हस्तेन ऋक्षसंयुता तत्र वादित्रगीतेन रात्रौ जागरणं कृतं ४० ते
न व्रतप्रभावेन आसनं चलितं मम संप्राप्तोहं तदा तत्र यत्र त्वं सखिभिः सहः प्रसन्नोस्मि मया प्रोक्तं वरं ब्रूहि वरानने
४२ पार्वत्युवाच यदि देव प्रसन्नोसि भर्ता भवतु मे हरः तथेत्युक्त्वा तु तां देवी कैलासं पुनरागतः ४३ ततः प्रभाते सं
प्राप्ते नद्यां सर्वं विसर्जनं पारणं तु कृतं तत्र सख्या सार्धं त्वया शुभे ४४ हिमवानपि तं देशमाजगाम घने वने चतुरा
शा निरीक्ष्य तु विह्वलः पतितः पुनः ४५ दृष्टा तत्र नदीतीरे प्रसुप्तं कन्यकाद्वयं उत्थाप्योत्संगमारोप्य रोदनं कृतवा
निरिः ४६ सिंहव्याघ्राहिभल्लूकवने ऽस्मिन् कथं स्थिता पार्वत्युवाच शृणु तात मया ज्ञातं ते त्वं दास्यसीश्वराय मां ४७ त
दन्यथा कृतं तात तेनाहं वनमागता ददासि तात यदि मामीश्वराय तदा गृहं ४८ आगमिष्यामि नैव चेदिह स्थास्यामि

ह॰ व्र॰ ४

निश्चिता तथेत्युक्त्वा हिमवंतानीतासी त्वं गृहं प्रति ४९ पश्चाद्दत्ता त्वमस्माकं कृत्वा वैवाहिकीं क्रियां तेन व्रतप्रभावे
न सौभाग्यं साधितं त्वया ५० अद्यापि व्रतराजं तु न कस्यापि निवेदितः नामास्य व्रतराजस्य शृणु देवि यथाभवत्
५१ आलीभिर्हरिता यस्मात्तस्माद्धरितालिका नामेदं कथितं तस्य विधिं वदस्व मम प्रभो किं पुण्यं किं फलं चास्य वो
न च क्रीयते व्रतं ५२ ईश्वरः शृणु देवि विधिं वक्ष्ये नारीणां व्रतमीदृशं करिष्यसि प्रयत्नेन यदि सौभाग्यमिच्छसि ५३
तोरणादि प्रकर्तव्यं कदलीस्तंभमंडितं आच्छाद्य पट्टवस्त्रैस्तु नानावर्णविचित्रितैः ५४ चंदनेन सुगंधेन लेपये
द्गृहमंडपं शंखभेरिमृदंगैश्च कारयेद्बहुनिस्वनैः ५५ नानामंगलगीतं च कर्तव्यं मम सद्मनि स्थापयेद्वालुकापिंडं पार्व
त्याः सहितं मम ५६ पूजयेद्बहुपुष्पैश्च गंधधूपादिभिर्नवैः नानाप्रकारैर्नैवेद्यैः पूजयेज्जागरं चरेत् ५७ नारिकेलैः पूग
फलैः जंबीरैर्बकुलैस्तथा बीजपूरैः सनारंगैः फलैश्चान्यैश्च भूरिशः ५८ ऋतुकालोद्भवैर्भूरिप्रकारैः कंदमूलकैः ग
धपुष्पैर्धूपदीपैर्मंत्रेणानेन पूजयेत् ५९ ॐ नमः शिवाय शांताय पंचवक्त्राय शूलिने नंदिभृंगीमहाकालगणयु
क्ताय शंभवे ६० शिवायै हरकांतायै प्रकृत्यै सृष्टिहेतवे शिवायै सर्वमांगल्यै शिवरूपजगन्मये ६१ शिवे कल्याणदे
नित्यं शिवरूपे नमोस्तु ते शिवरूपे नमस्तुभ्यं शिवायै सततं नमः ६२ नमस्ते ब्रह्मरूपिण्यै जगधात्र्यै नमः सदा संसा

ह॰ अ॰ पापनं विधिं ब्रूहि त्वं नीपापा सुरेश्वर भक्तितः श्रोतुमिच्छामि व्रतं संपूर्तिहेतवे १ ईश्वर उ॰ उद्यापनविधिं वक्ष्ये व्रतराजस्य
५ शोभने यस्यानुष्ठानमात्रेण संपूर्णं हि व्रतं भवेत् २ चतुस्तंभं चतुर्द्वारं कदलीस्तंभमंडितं घंटिकाचामरयुतं कमलैरुप-
शोभितं ३ चंदनागरुकर्पूरैर्लेपितं मंडपं शुभं मध्ये वितानावच्छिन्नं पंचवर्णैरलंकृतं ४ तन्मध्ये कारयेत्पद्मं पंचव-
र्णैः सुशोभनैः तस्योपरि न्यसेद्व्रीहीन् द्रोणेन परिसंमितान् ५ शौवर्णं राजतं ताम्रं कलशं विन्यसेद्बुधः पंच रत्नानि
निक्षिप्य सर्वौषधिसमन्वितं ६ तस्योपरि न्यसेत्पात्रं सौवर्णं राजतं हि वा वृषारूढं महादेवं रजतेन विनिर्मितं सर्वा
वयवसंयुक्तं गौरीं हेम्ना विनिर्मितां पूजयेत्तत्र गंधाद्यैः पुष्पैर्नानाविधैः शुभैः ८ रात्रौ जागरणं कुर्यात्कथावाचनपू-
र्वकं ततः प्रभाते विमले कृत्वा स्नानादिकं च ९ पूर्ववच्चार्चयेद्देवं पश्चाद्धोमं समाचरेत् स्वगृह्योक्तविधानेन कृत्वा
स्थापनं ततः १० प्रारंभे च ततो होमं गवां ग्रहः पुरःसरः तिलाश्च यवसंमिश्रा नानान्येन च परिप्लुतान् जुहुयाद्दूर्वामंत्रेण गौरि मे
वेदवित् अष्टोत्तरशतं वापि अष्टाविंशतिमेव वा १२ एवं समाप्य होमं तु ततश्चाचार्यं प्रपूजयेत् सुवर्णवस्त्रवासोभि
र्गां च दद्याद्यथाविधि १३ शय्यां शोपस्करां दद्यादाचार्याय ततः षोडशभिर्गां च दद्याद्यथाविधि १३ शय्यां शोपस्करा-
द्यादाचार्याय ततः षोडश द्विजपुंगवान् सपत्नीकान् नानाद्यैश्च भोजयेत् १४ सौभाग्यद्रव्यवस्त्राणि वंशपात्राणि षोडश दा

रमपसंतापात्राहिमेसिंहवाहिनी ६३ येनकामेनदेवित्वंपूजितासिमहेश्वरी राज्यसौभाग्यंसंपत्तिंदेहिमेमसपार्वति ६४
मंत्रेणानेनदेवित्वांपूजयित्वामयासह कथांश्रुत्वाविधानस्याद्दन्नंचभूरिशः ६५ ब्राह्मणेभ्योयथाशक्त्यादेयावस्त्रहि
रण्यगाः अन्येषांदीयतेभूरिस्त्रीणांवाभूषणादिकं ६६ भर्त्तासहकथांश्रुत्वाभक्तियुक्तेनचेतसा कृत्वाव्रतेश्वरंदेविसर्व-
पापैःप्रमुच्यते ६७ सप्तजन्मभवेद्राज्यंसौभाग्यंचैववर्धते पयपानेअहीमत्स्येफलाहारेतुमंजुकी ६८ सर्करागुडभ
क्ष्यंतिकीटीकीटश्चमक्षिकाः शृंगिपिष्टंतथान्यैवेपंचखाद्यादिकंतथा क्षुधार्त्तापिपिभक्ष्यंतिसाभवेयामूषिकाभवेत्
दधिभक्ष्यंतिमार्जारियास्त्रीविज्ञानसंयुता ६९ ततोपापायातुनारीआहारंकुरुतेयदि सप्तजन्मभवेद्वंध्यावैधव्यंज
न्मजन्मनि दरिद्रंपुत्रशोकंचकर्कशादुःखभागिनी ७० पच्यतेनरकेघोरेनोपवासंकरोतिया राजतेकांचनेताम्रे
वैणवेवाथमृन्मये ७१ भाजनेविन्यसेद्दत्तंसवस्त्रफलदक्षिणां वायनंद्विजवर्यायदद्याद्दत्तेचपारणां ७२ एवंविधिं
याकुरुतेचनारीत्वयासमानारमतेस्वभर्त्रा भोगाननेकान्भुविभुज्यमानासायुज्यमंतेलभतेहरेण ७३ अश्वमेधसहस्त्रा
णिवाजपेयशतानिच कथाश्रवनमात्रेणातत्फलंप्राप्यतेनरैः ७४ एततेकथितंदेवित्वाव्रतमुत्तमं कोटियज्ञा-
कृतंपुण्यंमस्यानुष्ठानमात्रतः ७५ इतिभविष्योत्तरेहरितालिकाव्रतकथासमाप्तः अथोद्यापनं पार्वत्युवाच उ

ह॰व्र आनिप्रयत्नेनब्राह्मणेभ्योयथाविधिः १५ अन्येभ्योविप्रेभ्योदक्षिणांचप्रयत्नत भूयसींदक्षिणांदत्वाप्रदद्याच्छिव
६ तुष्टये १६ उपदिष्टप्रपार्वतीशंचसर्वंकुर्यादतंद्रितः बंधुभिःसहभुंजीतनियतश्चपरेहनि एवंयाकुरुतेनारीव्रतराजं
समध्यमेसौभाग्यमखिलंतस्याःसप्तजन्मनसंशयः १८ इतिश्रीहरतालीकाविधिउद्यापनसमाप्तम्: ॥ ॐ ॥ ॐ ॥
श्रीकाशीविश्वनाथपुरीमेमहल्लासोनारपुरामेकेदारप्रभाकरछापाखानेमेगोपालचौबेकेइहाएहपोथीहरतालीका
व्रतकथाछापागया लि: रामसरनपांडेछापनेवालेकानामपन्नुकारीगरसंवत१९२७ मी:भाद्रपदकृष्ण ९ बा:श:

॥इतिहरतालिकाव्रतकथासमाप्तः॥